


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2020; 2(3): 509-511
Received: 16-05-2020
Accepted: 17-06-2020

**डॉ0 पवन कुमार**
ग्राम –फेंट, पोस्ट–बासोपट्टी,
जिला–मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ0 पवन कुमार**
ग्राम –फेंट, पोस्ट–बासोपट्टी,
जिला–मधुबनी, बिहार, भारत

# संस्कृतसाहित्ये छन्दसां प्रयोगाः प्रदर्शनीयाः

**डॉ0 पवन कुमार**

## प्रस्तावना

'छन्दः पादौ तु वेदस्य' [1] इति पाणिनीयशिक्षावचनात् छन्दः अङ्गवतो वेदस्य पादाङ्गस्वरूपम् । यथाहि पादाभ्यामेव शरीरिणो गतिर्भवति तथैव पादरूपेण छन्दसा मन्त्रात्मकवेदस्वरूपस्यावगतिः निर्मितः प्रगतिश्च भवति।

'छन्दांसि छादनत् [2] इतियास्कीयनिरुक्तेन छन्दोद्वारा आत्मनश्चछादनमावरणं भवति। 'यदेभिरात्मानमाच्छादयन् वेदाः मृत्योबिभ्यतः, तच्छन्दसा छन्दस्त्वम्' [3] इति ब्राह्मणेन छन्दसामावरकत्वं विज्ञायते। यथाहि मृत्योबिभ्यः अधुनातना मानवा अपि छन्दो निबद्धमहामृत्युञ्जयादिमन्त्रद्वारा आत्मनिमाच्छादयन्ति तथैव गाय यादिच्छन्दोमयैर्मन्त्रैः देवाः मृत्योर्बिभ्यतः आत्मतमाच्छादयन् अमराश्चभूवन् । एवं च छाद्यते अनेनेति व्यत्पत्या अन्तर्भावितण्यर्थात् छदिधातोः असन् प्रत्यये छन्दः निष्पद्यते । अथवा चन्दयति आह्नादयति चन्द्यते अनेन वेति व्युत्पत्या चदिधातो : छन्देरादेश्च छः [4] इत्यौणादिके असुनि चकारस्य छत्वे छन्द इति। गोतिलयादिना छन्दसः आह्लादजनकत्वं तु सहृदयानां सूविदितमेव।

एतद्धि छन्दो भगवतो वेदसय पादरूपमपि भगवतोऽनन्तस्य शिरोभूतमिति श्रीम द्भागवतं प्रतिपदायति [5]। एतेन पद्यात्मकरचनायां छन्दसः प्राधान्यं सुस्पष्टं भवति।

आयार्चदण्डिना 'शीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली [6] इति काव्यस्वरूपं निपयपता, काव्यस्य पद्यं, मिश्रं चेति भेदत्रयं विदधात, 'पद्यं चतुष्पदी' इत्येवं – प्रकारेण पद्यं लक्षयता पद्यरूश वृत्तं जातिरिति भेदद्वयं प्रतिपादयचिके। तत्र अक्षर – संख्यात –चरणं वृत्तम् मात्रासंख्यातचरणा जाति [7] रिति छन्दो नियमविधायकैरुच्यते। वैदिकवाङ्मयस्य प्रसिद्धं गायत्रीछन्दस्त्रिपादकम्, लोकेऽपि षट्चरणकं षट्पदी वृत्तं विख्यातमेव। अतः दण्डिनो लक्षणे चतुष्पदीति उपलक्षणमेवेति सुधियो मन्यन्ते। अतएव प्राञ्चः 'छान्दोनियमवद् वाक्य पद्यमि त्यभिधीयते , इत्याहुः । विश्वनाथकविराजोऽपि 'छन्दो– बद्धपदं पद्यम्' [8] इत्येव पद्यस्य स्वरूपं प्रतिपादयामास। अतश्छन्दो नियमबद्धपदमेव पद्यं नतु तत्र पादस्य नियमः। महाकाव्यादौ चतुश्चरणानामेव पद्धनमाधिक्येन साधारणतया पद्यं चतुष्पदीति व्यवहारः प्रामुख्यं भजते।

प्राचीने हि समये पद्यात्मकरचनासु महाकवयः छन्दोनियमपालन प्रधानममन्यन्त। अतएव च वामनाचार्य भिन्नवृत यतिभ्रष्ट विसन्धीनि वाक्यानि [9] इति त्रिविधेषु वाक्यदोषेषु दोषद्वयं वृतसम्बन्ध्येव प्रत्यपादयत। तत्र 'स्वलक्षणच्युतवृतं भिन्नवृत्तम्' [10] अर्थात् स्वस्माल्लक्षणात् च्यूतं वृत्तं यस्मिस्तत् स्वलक्ष्द्वाणच्युत वृतं वाक्यं भिन्नवृत्तम्। 'विरसविरामं यतिभ्रष्टम् [11] अर्थात् विरसः श्रुतिकटु विरामो यस्मिस्तत् विरसविरामं वाक्यं यतिभ्रष्टम्। एवं प्रकारेण छन्दोविषयका दोषाः परिगहरणीया इति प्राचामाशयः।

संस्कृतसाहित्य प्राचीनाः कवयोऽपि एतन्नियमस्य यथावत् पालनं कुर्वाणा एव –

> अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्।'

इत्येवमवोचन्। अत एव छान्दोनियमपालनस्य अनिवार्यतामङ्गी कुर्वन्तस्ते व्याकरणाशुद्धिमप्यसहन्त। एतच्च अधोलिखतः कतिपयैरेवोदाहरणैः सुस्पष्टं भवति।

पौराणिकसाहित्ये श्रीमद्भागवतमहापुराणं न केवलं पुराणदृष्ट्या मूर्धन्य–यमानमपि तु सरससुन्दरकाव्यदृष्ट्यापि तत् पुराणमद्वितीयम्। अत्र यावतां छन्दसां समुचितविधानं परिदृश्यते तत् पौराणिकसाहित्ये अन्यत्र अप्राप्यमेव ।अस्मिंश्च महापुराणे–

अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्।'

इति सिद्धान्तानुसारेण बहवः प्रयोगा विहिताः सन्ति।

शून्यभवेनेति। शून्यं भवद्विरहितं यद् भवनं गृहम् तस्य प्रकोष्ठो बहिर्गृहम् तस्य एका केवला रक्षा तस्याः पदातिः पादचारी सैनिकः।

आत्मानमिति। इन्दोश्चन्द्रस्य किरणैः करैः मेदुरः स्निग्धो यश्चन्द्रकान्तस्तम्भः चन्द्रकान्तमणिनिर्मितो दण्डः तद्वत् उज्ज्वलम् आत्मानम् स्वदेहम् मे मम वक्षसि हृदि वक्षसि वितर अर्पय, तेन निर्वृणोमि शान्तिं लभे सुखीभवामि। चपला चञ्चला अपि लक्ष्मीः भ्रातसङ्गमे या सुखासिका सुखावस्थानं तया हेतुना सकौस्तुभम् कौस्तुभाख्यरत्नभूषितम् विष्णोः उरो वक्षःस्थलम् न जहाति न त्यजति। कौस्तुभस्य लक्ष्म्याश्चैकस्मात्समुद्रादुत्पन्नत्वेन लक्ष्म्या भ्राता कौस्तुभस्तत्सहवास– सुखानुभवेनैव चपलापि लक्ष्मीर्विष्णोरुरोदेशं न जहाति, अत एव चन्द्रकान्त–मनोहरशीतलं स्वमङ्ग मुदरस्यर्पय येन भ्रातुरङ्गानां सम्पर्केण निर्वृतिं लभेयेति भावः।

उष्णकरस्य सूर्यस्य किरणनिकुरम्बेन करसमूहेन चुम्बितम् कमलखण्डम् कमलवनमिव। यथा सूर्यकरस्पृष्टं कमलकुलमानन्दति तथा त्वद्दर्शनेन मदीयं नयनमानन्दं लभतां तथा यतस्व मत्समीपमुपेहीत्यर्थः।

हे वत्स लक्ष्मण, चिरात् बहोः कालात् सोत्कण्ठम् तदालिङ्गनघृतोत्क–भावम् माम् भरतं परिरभस्व आलिङ्ग, भ्रातुरङ्गनि श्रद्धालुः सादरमादधानः सप्रेमालिङ्गन् जनः चन्दनेषु अपि अरोचकी अनास्थो भवतीत्यर्थः, भ्रातुरालिङ्गने जायमानं सुखं चन्दनविलेपनसुखमप्यतिशय्य वर्त्तत इत्याशयः। [12]

इन्दोरिति पङ्क्तिक्रमनिवेशिना श्रेणीक्रमपूर्वकं निधीयमानेन इन्दोश्चन्द्रस्य कलाकलापेन कलासमुदायेन कृताः रचिताः सोदर्याणां सोदराणां भ्रातॄणां भुजाः सर्व दुःखापनोदाय सकलकष्टवारणाय भवन्तीति शेषः, चन्द्रकलाभिरिव यथास्थानं निवेशिताभिः निर्मीयमाणाः सोदरभुजाः सकलमपि कष्टमपनुदन्तीति तात्पर्यम्।

पादुकाभृत्यानुभृत्यः पादुकाया भृत्यो भरतो नाम तस्यानुभृत्यः सेवकस्यापि सेवकः शत्रुघ्नः।

आवृत्त्यसा पुनरपि। शत्रुघ्नस्य लक्ष्मणानुजतया तस्मानरूपत्वेन लक्ष्मणरूपतया शत्रुघ्नदर्शनस्य आवृत्त्या लक्ष्मणदर्शनत्वमुक्तम्।

एतत्तदेवेति। अक्षतेन पूर्णमण्डलेन चन्द्रबिम्बेन संवावदूकम् मिलितं तुक्ष्यम् एतत् तदेव लक्ष्मणस्य मुखम् अवलोकय पश्य, यादृशं लक्ष्मणस्य मुखं तादृशमेवास्य शत्रुघ्नस्यापि मुखमिति पश्येत्यर्थः गीर्वाणाः देवास्तेषां वारणस्य करिण ऐरावतस्य करः शुण्डादण्डः, अर्गलः कपाप्रसरणप्रतिबन्धको लौहमयः काष्ठमयो वा दण्डश्च तद्वत्कर्कशौ कठिनौ तावेव लक्ष्मणभुजौ परिष्वजाते आलिङ्गतो मामिति शेषः, लक्ष्मणस्य मुखमिवास्य शत्रुघ्नस्य मुखं तस्य भुजाविवास्य भुजावपीति तात्पर्यम्। [13]

त्रैलोक्यशल्योद्धरणगौरवितैः

भुवनत्रितयमनोदुःखापनयनगौरवशालिभिः, भुवनत्रयशल्यं मेघनादं हतवान् लक्ष्मण इति प्रसिद्धैः, चरितैर्लक्ष्मणसदृशो भव, यथा लक्ष्मणो लोकत्रयदुःखापनयनयशस्वी तथा त्वमपि लोकत्रयदुःखापनयनयशस्वी भूया इत्यर्थः।

कृतमङ्गलोपचारः विहितमाङ्गलिकानुष्टानः। मध्यमाम्बाभवने कैकेयी गृहे।

विकर्त्तनकुलम् सूर्यवंशः, पुलस्त्यस्यकुलं च तयोः कीर्त्तितोरणमालायाः यशः– प्रशस्तिस्रजः, अवलम्बनस्तम्भौ आश्रयदण्डौ। सूर्यकुलस्य सुग्रीव इति बोध्यम्। पुलस्त्यकुलस्य विभीषणः इति च।

भार्गवः परशुरामः दशकनरस्य रावणस्य जेतारम् अर्जुनं कार्त्तवीर्यम् जितवानेव, तत्र कोऽपि सन्देहावसरो नैवास्ति काकपक्षकधरः शिखण्डकधारी शिशुः रामः यदि तं परशुरामं जितवान् तत् तदा इयं कथा रामस्य विजयवार्त्ता पूरिता समाप्तिं प्रकर्ष वा गता। परशुरामे जिते रावणादिजयस्य सिद्धवत्प्रतीयमानतया रामस्य जयवार्त्ता परशुरामजयेनैव पूर्णतां गतेत्यर्थः। तथापि बालचरितात् तस्य रावणवधादेः प्रक्रियायाः प्रकरणस्य मुद्रलङ्घनादिना गौरवात् गुरुत्वात् उर्ध्वं कल्पयतः पश्चात् रावणवधादिकं रचयतः अन्या अपरा इयं कविता वर्णना जगस्तोषाय वत्तिष्यते स्थास्यति। बालचरितात्परमपि राम चरितमधीत्य तोषं प्राप्स्यताम् लोकानां तृप्तय एव सकलोऽपि परशुरामजयोत्तरकालिको व्यापारकलापः। विजयस्तु परशुरामजयेनैव प्रत्यायित इत्यर्थः। 'बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डकः' इत्यमरः। तत् इदं रघुसिंहानाम् इदं सिंहासनम् राज्यासनम् अलङ्कुरु स्वोपवेशेन भूषितं कुरुष्व। उत्तरकोशलाः कोशलख्यजनपदविभागस्य उत्तरविभागः राजन्वन्तः सुराजसम्पन्नाः सन्तः मुदं प्रतन्वन्तु स्वमानन्दं विस्तारयन्तु। [14]

उदयन् उदयन् प्रतिपलं वर्धमानः धर्मस्कन्धः यस्य तादृशे त्वयि रामचन्द्रे धुरं राज्यभारं बिभ्रति धारयति सति प्रजाः प्रकृतयः दृष्टः परराजसमुत्थितः अदृष्टः अनावृष्टयादि समुत्थितश्च तौ परिभवौ क्लेशौ क्व नु जानते त्वयि राजनि प्रजानां दृष्टादृष्टकष्टयोर्नाम्नोऽपि ज्ञानमपि न सम्भवतीत्यर्थः। प्रभोः निग्रहानुग्रहसमर्थस्य परमात्मन ईश्वरस्य जीवात्मानो यथा तथा दिशि दिशि प्रतिदिशम् अष्टौ नाथा दिक्पाला इन्द्रादयोऽपि तवैव विभीषिकाः भयप्रदर्शनानि। यथा परमात्मनः स्वांशभूता जीवाः केवलं मिथ्याप्रत्ययभिन्ना तथैवेन्द्रादयोऽपि न त्वद्भिन्नाः ते तु त्वयैव प्रजानां भयमुत्पाद्य ताः सत्पथेन सञ्चारयितुं

विभीषिका रूपतया स्थापिता इत्यर्थः। 'अदृष्टं वह्नितोयादि दृष्टं त्वपरचक्रजम्' इत्यमरः।

दशकन्धरेण रावणेन आर्यात् पूजनीयात् ज्येष्ठभ्रातुः यक्षेश्वरात् कुवेरात् लङ्का नाम पुरी इदं पुष्पकं विमानं व्योमयानं च अपहृतम् बलादाच्छिद्य गृहीतम्, तयोर्लङ्कापुष्पकयोः एकां लङ्कां भवान् मह्यं रामाय अदित दत्तवान्, अन्यत् अवशिष्यमाणं चेदं पुष्पकम् द्रुतं शीघ्रं निधीनां पतिं वित्तेशं कुवेरम् उपैतु गच्छतु इति आज्ञापय, त्वदाज्ञया पुष्पकं कुवेरः पुराप्नोतु इत्याशयः। [15]

एव×च अनर्घराघवस्य प्रथमाध्याये श्लोकेऽस्मिन् बिम्ब–प्रतिबिम्बभावे छन्दसां प्रदर्शनं विद्यते। तद्यथा–

यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरितं
गुणैरेतावद्भिर्जगति पुनरन्यो जयति कः।
स्वमात्मानं तत्तद्गुणगरिमगम्भीरमधुर–
स्फुरद्वाग्ब्रह्माणः कथमुपकरिभ्यन्ति कवयः।। [16]

यदि पूर्वैः प्राचीनैः पण्डितैः वाल्मीकिप्रभृतिभिः क्षुण्ण्म् बहुशो वर्णितमिति कृत्वा रामस्य चरितम् रामायणीयं कथावस्तु जहति त्यजन्ति, यदि साम्प्रतिकाः कवयो भूतपूर्वकविभिराम्रेडिततया रामचरित्रं न स्वकविताविषयं चिकीर्षन्ति, तदा तत्तद्गुणानां माधुर्यौजः प्रसादादीनां गरिम्णा गौरवेण गम्भीरमर्थगुरु मधुरं हृद्यं च यथा स्यात्तथा स्फुरद्वाग्ब्रह्म शब्दरूपं ज्योतिर्येषां ते यथोक्ताः तत्तद्गुणपूर्णकवित्वशालिनः कवयः कथम् स्वम् आत्मानम् कथम् उपकरिष्यन्ति प्रतिपत्तिरूपमुपकारं प्रापयिष्यन्ति यशस्विनं करिष्यन्ति, यतः एतावद्भिः अपरिसंख्येयैर्गुणैर्जगति कोऽन्यो रामातिरिक्तो जयति सर्वोत्कर्षेण वर्त्तते पूर्वकविपरिगृहीततया यदि रामस्य चरितं साम्प्रतिकाः कवयो न स्वकवितायां विषयीकरिष्यन्ति तदा ते स्फुरद्वाग्ब्रह्माणः सन्तोऽपि कथमात्मानमुपकरिष्यन्ति, तादृशपुण्यकीर्त्तिनायकान्तरस्य दुर्लभत्वादित्यर्थः।

एवमेव अनर्घराघवस्य सप्तमाध्याये च विविधश्लोकेषु बिम्बप्रतिबिम्बभाव प्रदर्शनं छन्दसां प्रदर्शनं च नाटककारेण कृतो विद्यते। तद्यथा–

अणुराअरोमकण्टअसेअजलेहिं णिसाअरी कावि।
उद्दीविअणिव्वाविअदइदचिदाणलमनु मरेदि।। [17]

अर्थादत्र रसान् रसनीयद्रव्याणि ररसयितुमास्वादयितुं तावत् द्वे करणे जिह्वाद्वयरूपे साधने, अथ शब्दान् श्रोतुम् रूपाणि श्वेतपीतादीनि च द्रष्टुम् एकम् एकम् इन्द्रियम् चक्षूरूपम्, उरोगत्यै उरसा पुरः प्रसर्पणाय निगूढं प्रच्छन्नं गुप्तं पदम् चरणम्, अन्येषु अशनेषु भोज्यद्रव्येषु सत्स्वपि जगतः प्राणाः वायवः स्वदन्तेतराम् अतिस्वादिष्ठाः प्रतीयन्ते, मातः कद्रु, यदि भूयः पुनः भवती ईदृशान् सुतान् प्रसौति जनयति, नान्या माता ईदृशान्सुतान् प्रसौति धन्यासि मातः कद्रु, यदीदृशान् पुत्रान्प्रसूपे नान्या मातेदृशान्पुत्रान् प्रसोतुमर्हति, त्वया हि ये पुत्राः प्रसूतास्तेषां द्वे जिह्वे अन्येषामेकैव रसना, तव सुतानां सर्पाणां चक्षुःश्रवस्तया शब्दान् श्रोतुं रूपाणि द्रष्टुं चैकमेवेन्द्रियं चक्षूरूपम्, अन्येषां तु शब्दान् श्रोतुमपरं श्रोत्रम् रूपाणि द्रष्टुं चापरं चक्षुरिन्द्रियम्, अन्येषां गत्यै पादः प्रकटदृश्यस्तव पुत्रास्तु प्रच्छन्नैः पादैरुरसा सर्पन्ति, अन्ये विविधानि द्रव्याण्यश्नन्ति तव पुत्रास्तु तानि तानि द्रव्याणि परित्यज्य जगत्–प्राणमात्राशिनस्तदित्थं लोकविलक्षणास्तव सुतास्तेन त्वं धन्येति तात्पर्यम्।

एवञ्च संस्कृतस्य लौकिके वैदिके च साहित्ये छन्दसां प्रयोगः दृश्यते एव। छन्दसां बिना पद्यस्य रचनायां लालित्यं नागच्छति। छन्दसां मेव पद्यस्य रचना संभवतीति शास्त्रे लोकेच प्रतिपादितो विद्यते।

**सन्दर्भः**


1. पाणिनीयशिक्षायाम्।
2. निरूक्ते 7/3/ 12।
3. तत्रैव उदधृतम् ।
4. उणादि सूत्रम् 4/ 218।
5. छन्दास्यनन्तस्य शिरो गृणान्ति 2/1/ 31 ।
6. काव्यदर्शे, प्रथमपरिच्छेदे।
7. पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसंख्यातं जातिर्मात्राकमता भवेत् ।। द्रष्टव्यः शब्दकल्पद्रुमः।
8. साहित्यदर्पणे–6/302 ।
9. काव्यालंकारसूत्रवृत्तौ 2/2/1 ।
10. तत्रैव 2/2/2 ।
11. तत्रैव 2/2/3 ।
12. अनर्घराघवम्– 7/143 ।
13. अनर्घराघवम्– 7/145 ।
14. अनर्घराघवम्– 7/147।
15. अनर्घराघवम्– 7/149।
16. अनर्घराघवम्– 1/9।
17. अनर्घराघवम्– 7/9।